NCF-001-014211 Seat No. ________

# M. A. (Sem. II) (CBCS) Examination

April / May – 2017

## Sanskrit : Paper-ECT-02

*(Vedantashastra)*

*(वेदान्तशास्त्र) (ब्रह्मसूत्रशाङ्करभाष्ये – चतुःसूत्री)*

*(Old Course)*

**Faculty Code : 001**

**Subject Code : 014211**

Time : $2\frac{1}{2}$ Hours] [Total Marks : **70**

१ નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો સમજૂતિ સાથે અનુવાદ કરો : १४

1 Explain with translation any **two** portion of commentary : 14

(१) अत्राथ शब्द आनन्तर्यार्थः परिगृह्यते नाधिकारार्थः. ब्रह्मजिज्ञासा–याअनधिकार्यत्वात् । मङ्गलस्य च वाक्यार्थे सम्वयाभावात् । अर्थान्तरप्रयुक्त एव ह्यथशब्दः श्रुत्या मङ्गलप्रयोजनो भवति । पूर्वप्रकृतापेक्षायाश्च कलत आनन्तर्याव्यतिरकात् ।

(२) धर्मब्रह्मजिज्ञासयोः फलजिज्ञास्यभेदाच्च । अभ्युदयफलं धर्मज्ञानंतच्चानुष्ठानापेक्षम् । निःश्रेयसकलं तु प्रह्मविज्ञानं न चानुष्ठानान्तरापेक्षम । भव्यश्च धर्मो जिज्ञास्यो न ज्ञानकालेऽस्ति, पुरुषव्यापारतन्त्रत्वात्, इह तु भूतं ब्रह्म जिज्ञास्य नित्यत्वान्न पुरुषव्यापारतन्त्रम् ।

(३) न यथोक्तविशेषणस्य जगतो यथोक्तविशेषणमीश्वरं मुक्त्वान्यतः प्रधाना–दचेतनादगुभ्योऽभावात्संसारिणो वा उत्पत्त्यादि संभावयितुं शक्यम् । न च स्वभावतः विशिष्टदेशकालनिमित्तानामिहोदानात् । एतदेवानुमानं संसारिव्यतिरिक्तेश्वरास्तित्वादिसाधनं मन्यत ईश्वरकारणिनः ।

(४) जन्मोत्पत्तिरादिरस्येति तद्गुणसंविज्ञानो बहुव्रीहिः । जन्मस्थितिभङ्गं समासार्थः । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षं वस्तुवृत्तापेक्षं च । श्रुतिनिर्देश स्तावत् 'यतो वा इमानि भूतानि जायन्ते' (तैत्ति.३/१) इत्यस्मिन्वाक्ये जन्मस्मितिप्रलयानां क्रमदर्शनात् । वस्तुवृत्तमपि, जन्मना लब्धसत्ताकस्य धर्मिणः स्थितिप्रलयसंभवात् । अस्येति प्रत्यक्षादिसंनिधापितस्य धर्मिण इदमा निर्देशः । षष्ठी जन्मादिधर्मसंबन्धार्था । यत इति कारणनिर्देशः ।

૨ નીચેનામાંથી કોઈપણ **બે** ગદ્યખંડોનો સમજૂતિ સાથે અનુવાદ કરો : **૧૪**

**2** Explain with translation any **two** portion of commentary : **14**

(१) तद्यदि कर्त्तव्यशेषत्वेनोपदिश्येत, तेन च कर्तव्येन साध्यश्चेन्मोक्षोऽभ्युपगम्येत, अनित्य एव स्यात् । तत्रैवं सति यथोक्तकर्मफलेष्वेव तारतम्यावस्थितेष्वनित्येषु कश्चिदतिशयोमोक्ष इति प्रसज्येत नित्यश्च मोक्षः सर्वैर्मो क्षवादिभिरभ्युपगम्यते, अतो न कर्तव्यशेषत्वेन, ब्रह्मोपदेशो युक्तः ।

(२) महत ऋग्वेदादेः शास्त्रस्यानेक विद्यास्थानोपबृंहितस्य प्रदीपवत्सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । न हीदशस्य शास्त्रस्य ऋग्वेदादि – लक्षणस्य सर्वरागुणान्वितस्य सम्भवोऽस्ति । यद्यद्विस्तारार्थ शास्त्रं यस्मात्पुरुषविशेषात्सम्भवति, यथा व्याकरणादि पाणिन्यादेर्शेयैकदेशार्थमपि स ततोऽप्यधिकतर विज्ञान इति प्रसिद्धं लोके ।

(३) कथं पुनर्ब्रह्मणः शास्त्रप्रमाणकत्वमुच्यते, यावता आम्नायस्य क्रियार्थत्वा–दानर्थक्यमतदर्थानाम् (जै. सू.१/२/१) इति क्रियापरत्वं शास्त्रस्य प्रदर्शितम् । अतो वेदान्तानामानर्थक्यम्, अक्रियार्थत्वात् । कर्तृदेवतादिप्रकाशना–र्थत्वेन वा क्रियाविधि शेषत्वम्, उपासनादिक्रियान्तर विधानार्थत्वं वा । न हि परिनिष्ठत वस्तुप्रतिपादनं सम्भवति प्रत्यक्षादिविषयत्वात्परिनिष्ठितवस्तुनः ।

(४) तदुपासनाच्य शास्त्रदृष्टाऽदृष्टो मोक्षः फलं भविष्यतीति । कर्तव्यविध्यननुप्रवेशे वस्तुमात्र कथने हामोपादानासम्भवति, सप्रद्वीया वसुमती, राजासौ गच्छतीत्यादिवाक्यवद्वेदान्तवाक्यानमानर्थक्यमेव स्यात् । ननु वस्तुमात्रकथनेऽपि रज्जुरियं नायं सर्प इत्यादौ भ्रान्ति जनितभीतिनिवर्तनेनार्थवत्वं दृष्टं तथेहाप्यसंसार्यात्मकवस्तुकथनेन संसारित्वभ्रान्तिनिवर्तनेनार्थवत्त्वं स्यात् ।

૩ વેદાન્ત દર્શનના મુખ્ય આચાર્યોના દાર્શનિક મતો દર્શાવો. **૧૪**

**3** Write philosophical ideas of main Aacharyas of Vedanta-Darshan. **14**

**અથવા/OR**

૩ શંકરાચાર્યના જીવન અને સમય વિશે સવિસ્તર નોંધ લખો. **૧૪**

**3** Write a note in detail about the life and date of Sankarāchārya. **14**

૪ શાંકરભાષ્ય અનુસાર ''अथातो ब्रह्मजिज्ञासा'' સૂત્રને સમજાવો. ૧૪

4 Explain ''अथातो ब्रह्मजिज्ञासा'' Sutra as per शाङ्करभाष्यम्. 14

**અથવા/OR**

૪ શાંકરભાષ્ય અનુસાર ''जन्माद्यस्य यतः'' સૂત્રને સમજાવો. ૧૪

4 Explain 'जन्माद्यस्य यतः' Sutra as per शाङ्करभाष्यम्. 14

૫ નીચેનામાંથી કોઈપણ **બે** વિશે વિવેચનાત્મક નોંધ લખો : ૧૪

5 Write critical note on any **two** of the following : 14

(૧) अध्यासभाष्यम् ।

(૨) साधनचतुष्टयम् ।

(૩) ब्रह्मत्मैकत्वविज्ञानं सम्पद्रुपम् ।

(૪) शङ्कराचार्यस्य भाष्यलेखनशैली ।